International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 129-131
© 2024 IJSR
www.anantaajournal.com
Received: 20-07-2024
Accepted: 24-08-2024

**Dr. S Swaminathan**
Dean, Faculty of Health Sciences, Sri Jayendra Saraswathi Ayurveda College & Hospital (SJSACH), Nazarathpet, Chennai, Thiruvallur District, Dept of SCSVMV University, Kanchipuram, Tamil Nadu, India

**S Swaminathan**
Assisstant Professor, Department of Sanskrit, Sri Jayendra Saraswathi Ayurveda College & Hospital (SJSACH), Nazarathpet, Chennai, Thiruvallur District, Dept of SCSVMV University, Kanchipuram, Tamil Nadu, India

**Corresponding Author:**
**Dr. S Swaminathan**
Dean, Faculty of Health Sciences, Sri Jayendra Saraswathi Ayurveda College & Hospital (SJSACH), Nazarathpet, Chennai, Thiruvallur District, Dept of SCSVMV University, Kanchipuram, Tamil Nadu, India

# आयुर्वेद शास्त्रे अस्माभि: चिन्तित: विषय: दोषविषये

**Dr. S Swaminathan and S Swaminathan**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i5c.2493

## प्रस्तावना

### स्वास्थ्य प्रयोजनम्

"स्वस्थस्य स्वास्थ्य रक्षणं आतुरस्य विकार प्रशमनं" स्वस्मिन् य: तिष्ठति स: स्वस्थ: तस्य स्वास्थ्य रक्षणं प्राधानं आतुरस्य अर्थात् रुग्णस्य विकार प्रशमनं प्राप्तस्य रोगस्य नाश: कर्तव्य: भवति अस्वास्थ्यस्य नाश: विवक्षित: ।

### दोषत्रयम्

"वायु: पित्तं कफ: चेति त्रय: दोषा: समासत: विकृता अविकृता देहं घ्नन्ति ते वर्तयन्ति च " आयुर्वेदे त्रय: दोषा: भवन्ति वात: पित्त: कफ: इति एते दोषा: समानस्थितौ भवन्ति इति चेदेव जाठराग्नि: स्वकीयं कार्यं सम्यक् कार्यं करोति विहितेकाले बुभुक्षाया: उत्पत्ति: तस्या: नाश: अपि संभवति ।

समानस्थितौ दोषा: न भवन्ति इति चेत् जाठराग्नि: बाधित: भवति तेन बुभुक्षा अपि बाधिता भवति । अत: समानस्थितौ एते त्रय: दोषा: अवश्यं भवेयु:।

### सप्तधातवः

"*प्रीणनम् जीवनं लेपः स्नेहो धारणपुरणे। गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात् स्मृतम्* तत: परं आयुर्वेदे सप्त धातव: निरूपिता : भवन्ति रस:, रक्तं, मांसं, मेद:, अस्थि, मज्जा, शुक्रं एवं रीत्या सप्त धातव: भवन्ति एतेषां भिन्नतया कर्माणि निरूपितानि भवन्ति । अविकृतस्य रसस्य कर्म भवति तृप्ति: ।प्राणधारणं रक्तस्य कर्म भवति । मांसस्य उपदेहवर्धनं कर्म भवति । नेत्रादिषु स्निग्धत्वं मेदस: कर्म भवति । ऊर्ध्वधारणं अस्थिन: कर्म भवति । अस्थिपूरणं मज्ज: कर्म भवति । गर्भोत्पाद: शुक्रस्य कर्म भवति।

इदानीं वात: पित्त: कफ: एते देषा: समानस्थितौ न भवन्ति इति चेत् ते बाधका: भविष्यन्ति तेन धातव: बाधिता: भवेयु: तेन धातूनां स्वकीयकार्याणि बाधितानि भवेयु:।

**जाठराग्निः**

"तैर्भवेद्विषमस्तीक्ष्णो मन्दाश्चाग्निः समैः समः"

अत्र समाग्निः इत्यस्य अयं अर्थः वातः पित्तं कफः एते दोषाः समानस्थितौ भवन्ति इति चेदेव जाठराग्निःअपि समानस्थितौ भवति।
वातः इति दोषः वर्धितः चेत् कदाचित् बुभुक्षा भवेत् कदाचित् न स्यात्। पित्तदोषः वर्धितः चेत् जाठराग्नौ तीक्ष्णत्वं उष्णत्वं च वर्धितं भवति तद्वशात् सर्वदा महती बुभुक्षा भवति सर्वान् खादनपदार्थान् भस्मीकरोति।
कफः दोषः वर्धितः चेत् जाठराग्नौ तीक्ष्णत्वं उष्णत्वं इति विशेषणद्वयं अपगच्छति।मन्दत्वं शीतत्वं तस्मिन् काले वर्धितं भवति तद्वशात् अस्माकं शरीरे जलदोषः संभवति श्लेष्मादिकं बहु भवति तस्मात् कारणात् समानस्थितौ दोषाः अवश्यं भवेयुः तदानीं एव जाठराग्निः समीचीनः भवति।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।

इति श्लोके अपि उदरस्थः अग्निः भूत्वा चतुर्विधं अन्नं पचामि इति कृष्णः अवदत् भगवद्गीतायां अतः सर्वैः जाठराग्नेः रक्षणं अवश्यं कर्तव्यं।
एतस्मात् कारणात् समानस्थितौ दोषाणां सत्वं तथा प्राधानं भवति एतावता समदोषः इति अस्मिन् विषये महान् विचारः कृतः तस्मिन् एव विषये अनुवर्तनं क्रियते तदपि विशिष्य वाताख्य दोषस्य समानस्थितिः नष्टा चेत् बाधकं कियत् स्यात् इति निरूप्यते।

**वातप्रकोपः**
"तत्रबलवद्विग्रहातिव्यायामव्यवायाध्ययनप्रपतनप्रधावनप्रपीडनाभिघातलङ्घनप्लवनतरणरात्रिजागरणभारहरणगजतुरगरथपदातिचर्याकटुकषायतिक्तरूक्षलघुशीतवीर्यशुष्कशाकवल्लूरवरकोद्दालककोरदूषश्यामाकनीवारमुद्गमसूराढकीहरेणुकलायनिष्पावानशनविषमाशनाध्यशनवातमूत्रपुरीषशुक्रच्छर्दिक्षवथूद्गारबाष्पवेगविघातादिभिर्विशेषैर्वायुः प्रकोपमापद्यते "
वाताख्यदोषस्य वर्धनं अत्यन्तव्यायामः स्त्री-पुरुष संयोगः बहुवारं , बहु उच्चैः भाषणं, भूतलादौ पतनं , रात्रौ निद्रायाः अभावः, बहुभारवहनं , गजादिषु बहुकालपर्यन्तं गमनं।
कटुकषायतिक्तरूक्षलघुशीतादिगुणविशिष्टभोजनवस्तूनां बहु ग्रहणं , अविहिते काले भोजनं ,पूर्वं यत् खादितं तस्य शमनाभावे अपि पुनः भोजनं, विरुद्ध भोजनपदार्थानां ग्रहणं।

**पित्तप्रकोपः**
"क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवण-तीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसीहरितकशाक-गोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविकाराम्लफलकट्वरप्रभृतिभिः पित्तं प्रकोपमापद्यते"
अत्यन्त क्रोधस्य प्राप्तिः अत्यन्तदुःखम् अत्यन्तभीतिः बहुकाल पर्यन्तं भोजनाभावः बहुकाल पर्यन्तं मैथुनं कुटु आम्ल लवणादि रस विशिष्ट भोजनवस्तूनां बहु ग्रहणं एवं तीक्ष्णत्व उष्णत्व लघुत्वादि गुणविशिष्ट भोजनवस्तूनां ग्रहणं।
अजविशेषसस्य यत् मामंसं तस्य बहु स्वीकारः मत्स्यादीनां बहुभोजनं, स्नेहरहितं यत् दधि तस्य व्यञ्जनेन सह बहु स्वीकारः एवं आम्लफलानि यानि प्रसिद्धानि तेषां बहु स्वीकारः दाडिमफलं एवं आमलकीफलं इति फलद्वयं परित्यज्य सर्वेषां आम्लफलानां स्वीकारः। पित्ताख्यदोषस्य वर्धानार्थं कारणं भवति। माषमहामाषगोधूमतिलपिष्टादि वस्तूनां बहु ग्रहणं। कफदोषं बहुवर्धयति।

**कफप्रकोपः**
"दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कट-माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाबिसमृणालकसेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते"

प्रातः काले निद्रा व्यायामराहित्यं आलस्यं। मधुर आम्ल लवणादि गुण विशिष्ट भोजनवस्तूनां ग्रहणं एवं शीतत्व स्निग्धत्व गुरुत्व पिच्छिलत्वादि गुण विशिष्ट खादनवस्तूनां ग्रहणं।

**रक्तप्रकोप:**

"पित्तप्रकोपणैरेव चाभीक्ष्णं द्रवस्निग्धगुरुभिराहारैर्दिवास्वप्नक्रोधानलातपश्रमाभिघाता जीर्णविरुद्धाध्यशनादिभिर्विशेषैरसृक् प्रकोपमापद्यते"

द्रवत्व स्निग्धत्व गुरुत्वादि गुण विशिष्ट वस्तूनां स्वीकार: प्रभाते निद्रा अत्यन्तक्रोध: अत्यन्त आतपे स्थानं अभिघात: उदरे अजीर्णता इति एतानि सर्वानि कारणानि भवन्ति ।

"रोगस्तु दोषवैषम्यम् दोष साम्यम् अरोगता"

अत: सर्वे अपि दोषा: समानस्थितौ यथा भवेयु: तथा स्थिति: संपादनीया दोषाणां प्रकोप: वा नाश : वा यथा न भवेत् तथा तेषां परिरक्षणं अस्माभि : आजीवनपर्यन्तं अवश्यं कर्तव्यं। अग्रे अपि अग्नि विषये विचारं करिष्याम: ।

## सन्दर्भ सूची


1. Soumya Saraswathi M, Subrahmanya K, Padyana S. Inter-relation between ayurveda and jyoutisha shastra; c2020.
2. Patwardhan B, Joglekar V, Pathak N, Vaidya A. Vaidya-scientists: catalysing Ayurveda renaissance. Current Science. 2011 Feb 25:476-83.
3. Saper RB, Phillips RS, Sehgal A, Khouri N, Davis RB, Paquin J, Thuppil V, Kales SN. Lead, mercury, and arsenic in US-and Indian-manufactured Ayurvedic medicines sold via the Internet. Jama. 2008 Aug 27;300(8):915-23.
4. Chaudhary A, Singh N. Herbo mineral formulations (rasaoushadhies) of ayurveda an amazing inheritance of ayurvedic pharmaceutics. Ancient science of life. 2010 Jul 1;30(1):18-26.
5. Gupta AK, Farheen K, Mahanta V, Sherkhane R, Gupta SK. Ashtavidha Shastra Karma in Surgical Practice. Journal of Ayurveda and Integrated Medical Sciences. 2020 Jun 30;5(03):155-8.